# स्वप्नवासवदत्तम्(१म-अङ्कः)

पूर्वं त्वयाप्यभिमतं गतमेवमासीच्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः।

कालक्रमेण जगतः परिवर्तमाना चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः।।४।।

**उत्सः** - प्रस्तुतश्लोकमिदं कविभासविरचितस्य स्वप्नवासवदत्तमिति नाटकस्य प्रथमाङ्काद् गृहीतम्।

**प्रसङ्गः** - मगधराज्यस्य प्रान्तवर्तिनि आश्रमे मगधराजपुरुषैः आश्रमस्थाणाम् उत्सारणाकाले तत्रोपस्थितायाः राजमहिष्याः वासवदत्तायाः उत्सारणजनिततिरस्कारहेतोः अनादरे जाते राजमन्त्रियौगन्धरायणकर्तृकेन तस्यै आश्वासप्रादाणार्थं उक्तश्लोकवाक्यं उक्तम्।

**व्याख्या** – पूर्वस्मिन् काले वासवदत्तायाः अपि राजकन्यापद्मावत्याः इव समादरपूर्वकं परिजनपरिवेष्टितम् इच्छानुरूपं गमनागमनम् आसीत्। इदानीम् तु भर्तुः उदयनस्य राज्ये अपहृते सति पराधीनतावशात् तत् स्वेच्छाचरणं नास्ति। पुनः यदा विजयेन हृतराज्यस्य उद्धारः भविष्यति तदा पुनः वासवदत्ता श्लाघ्यतां प्रशंसनीयतां वा प्राप्सति इति मन्त्रीयौगन्धरायणस्य अभिमतः। अथ अस्य दृष्टान्तमेकं उपस्थाप्यते यथा परिवर्तनशीला चक्रारपङ्क्तिरिव अस्य लोकस्य भाग्यपङ्क्तिः नाम भाग्यचक्रमपि कालक्रमेण समयानुसारं व्रजति इति। अर्थात् अस्माकं यत् भाग्यं तत् सदा एकरूपं न तिष्ठति तत् तु सदा परिवर्तनशीलमिति। अद्य यः तु दरिद्रः प्रयत्नवशाद् भविष्यति काले स धनी इति भवितुमर्हति। अतः वर्तमानसमयापेक्ष्यं दुःखं न कर्तव्यमिति।

**अलंकारः छन्दश्च** - अत्र पूर्वाधप्रतिपादितस्य विशेषस्योत्तरार्धप्रतिपादितेन सामान्येनार्थेन समर्थनात् सामान्येन विषेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः। अथ वसन्ततिलकमिति नाम छन्दश्च।